# ॥ बिल्वाष्टोत्तर शतनामावलिः ॥

The following is bilvaaShTottarashatanAma stotra which praises Lord Shiva in beautiful words. It is recited during the worship of Shiva. The specialty of this hymn being that it uses words which are relatively simple in nature but at the same time have a really soothing effect to the ears when recited. This hymn extols Him as sarveshvara,
Lord of everything, and sadaashaanta, ever-peaceful.
Needless to say, it is most aptly suited for mAnasapuuja, mental worship.
Bilva leaves are dearest to the Lord, and so are especially used in shiva puuja. Shriishaila or Shriigiri is one of the holiest shrines of Lord Shiva, located in South-India. Bilva trees are widely found on the mountains of this shrine. Hence this shrine is known as shriishaila.n (shrii here being referred to the bilva trees). Adishankara is supposed to have composed the immortal hymns shivaanandalahari and sau.ndaryalahari, while he was living on these holy mountains.
Hence shriishaila.n is mentioned in both these hymns.

"shriigiri mallikArjuna mahaalinga.n shivaali.ngitam "
in shivaanandalahari(50th poem).
When reciting this wonderful hymn one does not really need these sacred leaves to worship them. But one can surely imagine that he is sitting in the sanctum-sanctorum of shriigiri and that he is worshipping that mahaalinga.n (shiva) which is in union with Shiva (shivaa + aali.ngitam = shivaali.ngitam). That very thought is enough to transport one into that infinite bliss. He is blessed who meditates on this undivided aspect of Shiva.

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधम् ।
त्रिजन्म पापसंहारम् एक बिल्वं शिवार्पणम् ॥ १॥
त्रिशाखैः बिल्व पत्रैश्च अच्छिद्रैः कोमलैः शुभैः ।
तव पूजां करिष्यामि एक बिल्वं शिवार्पणम् ॥ २॥
सर्वत्रैलोक्य कर्तारं सर्वत्रैलोक्य पालनम् ।
सर्वत्रैलोक्य हर्तारम् एक बिल्वं शिवार्पणम् ॥ ३॥
नागाधिराजवलयं नागहारेणभूषितम् ।
नागकुंडलसंयुक्तम् एक बिल्वं शिवार्पणम् ॥ ४॥
अक्षमालाधरं रुद्रं पार्वती प्रियवल्लभम् ।
चन्द्रशेखरमीशानम् एक बिल्वं शिवार्पणम् ॥ ५॥
त्रिलोचनं दशभुजं दुर्गादेहार्धधारिणम् ।
विभूत्यभ्यर्चितं देवं एक बिल्वं शिवार्पणम् ॥ ६॥
त्रिशूलधारिणं देवं नागाभरणसुन्दरम् ।

चन्द्रशेखरमीशानम् एक बिल्वं शिवार्पणम् ॥ ७ ॥
गङ्गाधराम्बिकानाथं फणिकुण्डलमण्डितम् ।
कालकालं गिरीशं च एक बिल्वं शिवार्पणम् ॥ ८ ॥
शुद्धस्फटिक संकाशं शितिकंठं कृपानिधिम् ।
सर्वेश्वरं सदाशान्तम् एक बिल्वं शिवार्पणम् ॥ ९ ॥
सच्चिदानन्दरूपं च परानन्दमयं शिवम् ।
वागीश्वरं चिदाकाशं एक बिल्वं शिवार्पणम् ॥ १० ॥
शिपिविष्टं सहस्राक्षं कैलासाचलवासिनम् ।
हिरण्यबाहुं सेनान्यम् एक बिल्वं शिवार्पणम् ॥ ११ ॥
अरुणं वामनं तारं वास्तव्यं चैव वास्तवम् ।
ज्येष्टं कनिष्ठं गौरीशम् एक बिल्वं शिवार्पणम् ॥ १२ ॥
हरिकेशं सनन्दीशम् उच्चैर्घोषं सनातनम् ।
अघोररूपकं कुंभम् एक बिल्वं शिवार्पणम् ॥ १३ ॥
पूर्वजावरजं याम्यं सूक्ष्म तस्करनायकम् ।
नीलकंठं जघंन्यंच एक बिल्वं शिवार्पणम् ॥ १४ ॥
सुराश्रयं विषहरं वर्मिणं च वरूधिनम्
महासेनं महावीरम् एक बिल्वं शिवार्पणम् ॥ १५ ॥
कुमारं कुशलं कूप्यं वदान्यञ्च महारधम् ।
तौर्यातौर्यं च देव्यं च एक बिल्वं शिवार्पणम् ॥ १६ ॥
दशकर्णं ललाटाक्षं पञ्चवक्त्रं सदाशिवम् ।
अशेषपापसंहारम् एक बिल्वं शिवार्पणम् ॥ १७ ॥
नीलकण्ठं जगद्वंद्यं दीननाथं महेश्वरम् ।
महापापसंहारम् एक बिल्वं शिवार्पणम् ॥ १८ ॥
चूडामणीकृतविभुं वलयीकृतवासुकिम् ।
कैलासवासिनं भीमम् एक बिल्वं शिवार्पणम् ॥ १९ ॥
कर्पूरकुंदधवलं नरकार्णवतारकम् ।
करुणामृतसिंधुं च एक बिल्वं शिवार्पणम् ॥ २० ॥
महादेवं महात्मानं भुजङ्गाधिप कङ्कणम् ।
महापापहरं देवम् एक बिल्वं शिवार्पणम् ॥ २१ ॥
भूतेशं खण्डपरशुं वामदेवं पिनाकिनम् ।
वामे शक्तिधरं श्रेष्ठम् एक बिल्वं शिवार्पणम् ॥ २२ ॥
फालेक्षणं विरूपाक्षं श्रीकंठं भक्तवत्सलम् ।
नीललोहितखट्वाङ्गम् एक बिल्वं शिवार्पणम् ॥ २३ ॥
कैलासवासिनं भीमं कठोरं त्रिपुरान्तकम् ।
वृषाङ्कं वृषभारूढम् एक बिल्वं शिवार्पणम् ॥ २४ ॥
सामप्रियं सर्वमयं भस्मोद्धूलित विग्रहम् ।

मृत्युञ्जयं लोकनाथम् एक बिल्वं शिवार्पणम् ॥ २५ ॥
दारिद्र्यदुःखहरणं रविचन्द्रानलेक्षणम् ।
मृगपाणिं चन्द्रमौळिम् एक बिल्वं शिवार्पणम् ॥ २६ ॥
सर्वलोकभयाकारं सर्वलोकैकसाक्षिणम् ।
निर्मलं निर्गुणाकारम् एक बिल्वं शिवार्पणम् ॥ २७ ॥
सर्वतत्त्वात्मकं साम्बं सर्वतत्त्वविदूरकम् ।
सर्वतत्त्वस्वरूपं च एक बिल्वं शिवार्पणम् ॥ २८ ॥
सर्वलोक गुरुं स्थाणुं सर्वलोकवरप्रदम् ।
सर्वलोकैक नेत्रं च एक बिल्वं शिवार्पणम् ॥ २९ ॥
मन्मथोद्धरणं शैवं भवभर्गं परात्मकम् ।
कमलाप्रिय पूज्यं च एक बिल्वं शिवार्पणम् ॥ ३० ॥
तेजोमयं महाभीमम् उमेशं भस्मलेपनम् ।
भवरोगविनाशं च एक बिल्वं शिवार्पणम् ॥ ३१ ॥
स्वर्गापवर्गफलदं रघुनाथवरप्रदम् ।
नगराजसुताकांतम् एक बिल्वं शिवार्पणम् ॥ ३२ ॥
मंजीरपादयुगलं शुभलक्षणलक्षितम् ।
फणिराज विराजं च एक बिल्वं शिवार्पणम् ॥ ३३ ॥
निरामयं निराधारं निस्सङ्गं निष्प्रपञ्चकम् ।
तेजोरूपं महारौद्रम् एक बिल्वं शिवार्पणम् ॥ ३४ ॥
सर्वलोकैक पितरं सर्वलोकैक मातरम् ।
सर्वलोकैक नाथं च एक बिल्वं शिवार्पणम् ॥ ३५ ॥
चित्राम्बरं निराभासं वृषभेश्वर वाहनम् ।
नीलग्रीवं चतुर्वक्त्रम् एक बिल्वं शिवार्पणम् ॥ ३६ ॥
रत्नकञ्चुकरत्नेशं रत्नकुण्डल मण्डितम् ।
नवरत्न किरीटं च एक बिल्वं शिवार्पणम् ॥ ३७ ॥
दिव्यरत्नाङ्गुली स्वर्णं कण्ठाभरणभूषितम् ।
नानारत्नमणिमयम् एक बिल्वं शिवार्पणम् ॥ ३८ ॥
रत्नाङ्गुलीय विलसत्करशाखानखप्रभम् ।
भक्तमानस गेहं च एक बिल्वं शिवार्पणम् ॥ ३९ ॥
वामाङ्गभाग विलसदम्बिका वीक्षणप्रियम् ।
पुण्डरीकनिभाक्षं च एक बिल्वं शिवार्पणम् ॥ ४० ॥
सम्पूर्णकामदं सौख्यं भक्तेष्टफलकारणम् ।
सौभाग्यदं हितकरम् एक बिल्वं शिवार्पणम् ॥ ४१ ॥
नानाशास्त्रगुणोपेतं स्फुरन्मंगल विग्रहम् ।
विद्याविभेदरहितम् एक बिल्वं शिवार्पणम् ॥ ४२ ॥
अप्रमेयगुणाधारं वेदकृद्रूप विग्रहम् ।

धर्माधर्म प्रवृत्तं च एक बिल्वं शिवार्पणम् ॥ ४३॥
गौरीविलाससदनं जीवजीवपितामहम् ।
कल्पान्तभैरवं शुभ्रम् एक बिल्वं शिवार्पणम् ॥ ४४॥
सुखदं सुखनाशं च दुःखदं दुःखनाशनम् ।
दुःखावतारं भद्रं च एक बिल्वं शिवार्पणम् ॥ ४५॥
सुखरूपं रूपनाशं सर्वधर्म फलप्रदम् ।
अतींद्रियं महामायम् एक बिल्वं शिवार्पणम् ॥ ४६॥
सर्वपक्षिमृगाकारं सर्वपक्षिमृगाधिपम् ।
सर्वपक्षिमृगाधारम् एक बिल्वं शिवार्पणम् ॥ ४७॥
जीवाध्यक्षं जीववंद्यं जीवजीवनरक्षकम् ।
जीवकृज्जीवहरणम् एक बिल्वं शिवार्पणम् ॥ ४८॥
विश्वात्मानं विश्ववंद्यं वज्रात्मावज्रहस्तकम् ।
वज्रेशं वज्रभूषं च एक बिल्वं शिवार्पणम् ॥ ४९॥
गणाधिपं गणाध्यक्षं प्रलयानलनाशकम् ।
जितेन्द्रियं वीरभद्रम् एक बिल्वं शिवार्पणम् ॥ ५०॥
त्र्यम्बकं मृडं शूरं अरिषड्वर्गनाशनम् ।
दिगम्बरं क्षोभनाशम् एक बिल्वं शिवार्पणम् ॥ ५१॥
कुन्देन्दु शंखधवलम् भगनेत्रभिदुज्ज्वलम् ।
कालाग्निरुद्रं सर्वज्ञम् एक बिल्वं शिवार्पणम् ॥ ५२॥
कम्बुग्रीवं कम्बुकंठं धैर्यदं धैर्यवर्धकम् ।
शार्दूलचर्मवसनम् एक बिल्वं शिवार्पणम् ॥ ५३॥
जगदुत्पत्ति हेतुं च जगत्प्रलयकारणम् ।
पूर्णानन्द स्वरूपं च एक बिल्वं शिवार्पणम् ॥ ५४॥
सर्गकेशं महत्तेजं पुण्यश्रवण कीर्तनम् ।
ब्रह्मांडनायकं तारम् एक बिल्वं शिवार्पणम् ॥ ५५॥
मन्दारमूलनिलयं मन्दारकुसुमप्रियम् ।
बृन्दारकप्रियतरम् एक बिल्वं शिवार्पणम् ॥ ५६॥
महेन्द्रियं महाबाहुं विश्वासपरिपूरकम् ।
सुलभासुलभं लभ्यम् एक बिल्वं शिवार्पणम् ॥ ५७॥
बीजाधारं बीजरूपं निर्बीजं बीजवृद्धिदम् ।
परेशं बीजनाशं च एक बिल्वं शिवार्पणम् ॥ ५८॥
युगाकारं युगाधीशं युगकृद्युगनाशनम् ।
परेशं बीजनाशं च एक बिल्वं शिवार्पणम् ॥ ५९॥
धूर्जटिं पिङ्गलजटं जटामण्डलमण्डितम् ।
कर्पूरगौरं गौरीशम् एक बिल्वं शिवार्पणम् ॥ ६०॥
सुरावासं जनावासं योगीशं योगिपुङ्गवम् ।

योगदं योगिनां सिंहम् एक बिल्वं शिवार्पणम् ॥ ६१॥
उत्तमानुत्तमं तत्त्वम् अंधकासुरसूदनम् ।
भक्तकल्पद्रुमस्तोमम् एक बिल्वं शिवार्पणम् ॥ ६२॥
विचित्रमाल्यवसनं दिव्यचन्दनचर्चितम् ।
विष्णुब्रह्मादि वंद्यं च एक बिल्वं शिवार्पणम् ॥ ६३॥
कुमारं पितरं देवं श्रितचन्द्रकलानिधिम् ।
ब्रह्मशत्रुं जगन्मित्रम् एक बिल्वं शिवार्पणम् ॥ ६४॥
लावण्यमधुराकारं करुणारसवारधिम् ।
भ्रुवोर्मध्ये सहस्रार्चिम् एक बिल्वं शिवार्पणम् ॥ ६५॥
जटाधरं पावकाक्षं वृक्षेशं भूमिनायकम् ।
कामदं सर्वदागम्यम् एक बिल्वं शिवार्पणम् ॥ ६६॥
शिवं शान्तं उमानाथं महाध्यानपरायणम् ।
ज्ञानप्रदं कृत्तिवासम् एक बिल्वं शिवार्पणम् ॥ ६७॥
वासुक्युरगहारं च लोकानुग्रहकारणम् ।
ज्ञानप्रदं कृत्तिवासम् एक बिल्वं शिवार्पणम् ॥ ६८॥
शशाङ्कधारिणं भर्गं सर्वलोकैकशङ्करम् ।
शुद्धं च शाश्वतं नित्यम् एक बिल्वं शिवार्पणम् ॥ ६९॥
शरणागत दीनार्ति परित्राणपरायणम् ।
गम्भीरं च वषट्कारम् एक बिल्वं शिवार्पणम् ॥७०॥
भोक्तारं भोजनं भोज्यं जेतारं जितमानस् ।
करणं कारणं जिष्णुम् एक बिल्वं शिवार्पणम् ॥ ७१॥
क्षेत्रज्ञं क्षेत्रपालञ् च परार्धैकप्रयोजनम् ।
व्योमकेशं भीमवेषम् एक बिल्वं शिवार्पणम् ॥ ७२॥
भवज्ञं तरुणोपेतं चोरिष्टं यमनाशनम् ।
हिरण्यगर्भं हेमाङ्गम् एक बिल्वं शिवार्पणम् ॥ ७३॥
दक्षं चामुण्डजनकं मोक्षदं मोक्षनायकम् ।
हिरण्यदं हेमरूपम् एक बिल्वं शिवार्पणम् ॥ ७४॥
महाश्मशाननिलयं प्रच्छन्न स्फटिकप्रभम् ।
वेदास्यं वेदरूप। च एक बिल्वं शिवार्पणम् ॥ ७५॥
स्थिरं धर्मम् उमानाथं ब्रह्मण्यं चाश्रयं विभुम् ।
जगन्निवासं प्रथममेक बिल्वं शिवार्पणम् ॥ ७६॥
रुद्राक्षमालाभरणं रुद्राक्षप्रियवत्सलम् ।
रुद्राक्षभक्त संस्तोममेक बिल्वं शिवार्पणम् ॥ ७७॥
फणीन्द्र विलसत्कंठं भुजङ्भरणप्रियम् ।
दक्षाध्वर विनाशं च एक बिल्वं शिवार्पणम् ॥ ७८॥
नागेन्द्र विलसत्कर्णं महीन्द्रवलयावृतम् ।

मुनिवंद्यं मुनिश्रेष्ठमेक बिल्वं शिवार्पणम् ॥ ७९ ॥
मृगेन्द्रचर्मवसनं मुनीनामेकजीवनम् ।
सर्वदेवादि पूज्यं च एक बिल्वं शिवार्पणम् ॥ ८० ॥
निधनेशं धनाधीशम् अपमृत्युविनाशनम् ।
लिङ्गमूर्तिमलिङ्गात्मम् एक बिल्वं शिवार्पणम् ॥ ८१ ॥
भक्तकल्याणदं व्यस्तं वेदवेदांतसंस्तुतम् ।
कल्पकृत्कल्पनाशं च एक बिल्वं शिवार्पणम् ॥ ८२ ॥
घोरपातकदावाग्निं जन्मकर्मविवर्जितम् ।
कपालमालाभरणम् एक बिल्वं शिवार्पणम् ॥ ८३ ॥
मातङ्गचर्मवसनं विराड्रूपविदारकम् ।
विष्णुक्रांतमनंतं च एक बिल्वं शिवार्पणम् ॥ ८४ ॥
यज्ञकर्मफलाध्यक्षं यज्ञविघ्नविनाशकम् ।
यज्ञेशं यज्ञभोक्तारम् एक बिल्वं शिवार्पणम् ॥ ८५ ॥
कालाधीशं त्रिकालज्ञं दुष्टनिग्रहकारकम् ।
योगिमानसपूज्यं च एक बिल्वं शिवार्पणम् ॥ ८६ ॥
महोन्नतमहाकायं महोदरमहाभुजम् ।
महावक्त्रं महावृद्धम् एक बिल्वं शिवार्पणम् ॥ ८७ ॥
सुनेत्रं सुललाटं च सर्वभीमपराक्रमम् ।
महेश्वरं शिवतरम् एक बिल्वं शिवार्पणम् ॥ ८८ ॥
समस्तजगदाधारं समस्तगुणसागरम् ।
सत्यं सत्यगुणोपेतम् एक बिल्वं शिवार्पणम् ॥ ८९ ॥
माघकृष्णचतुर्दश्यां पूजार्थं च जगद्गुरोः ।
दुर्लभं सर्वदेवानाम् एक बिल्वं शिवार्पणम् ॥ ९० ॥
तत्रापिदुर्लभं मन्येत् नभोमासेन्दुवासरे ।
प्रदोषकालेपूजायाम् एक बिल्वं शिवार्पणम् ॥ ९१ ॥
तटाकंधननिक्षेपं ब्रह्मस्थाप्यं शिवालयम्
कोटिकन्यामहादानम् एक बिल्वं शिवार्पणम् ॥ ९२ ॥
दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम्।
अघोरपापसंहारम् एक बिल्वं शिवार्पणम् ॥ ९३ ॥
तुलसीबिल्वनिर्गुण्डी जंबीरामलकं तथा ।
पञ्चबिल्वमितिख्यातम् एक बिल्वं शिवार्पणम् ॥ ९४ ॥
अखण्डबिल्वपत्रैश्च पूजयेन्नंदिकेश्वरम् ।
मुच्यते सर्वपापेभ्यः एक बिल्वं शिवार्पणम् ॥ ९५ ॥
सालंकृताशतावृत्ता कन्याकोटिसहस्रकम् ।
साम्राज्यपृथ्वीदानं च एक बिल्वं शिवार्पणम् ॥ ९६ ॥
दन्त्यश्वकोटिदानानि अश्वमेधसहस्रकम् ।

सवत्सधेनुदानानि एक बिल्वं शिवार्पणम् ॥ ९७ ॥
चतुर्वेदसहस्राणि भारतादिपुराणकम् ।
साम्राज्यपृथ्वीदानं च एक बिल्वं शिवार्पणम् ॥ ९८ ॥
सर्वरत्नमयं मेरुं काञ्चनं दिव्यवस्त्रकम् ।
तुलाभागं शतावर्तम् एक बिल्वं शिवार्पणम् ॥ ९९ ॥
अष्टोत्तरश्शतं बिल्वं योर्चयेल्लिङ्गमस्तके ।
अधर्वोक्तम् अधेभ्यस्तु एक बिल्वं शिवार्पणम् ॥ १०० ॥
काशीक्षेत्रनिवासं च कालभैरवदर्शनम् ।
अघोरपापसंहारम् एक बिल्वं शिवार्पणम् ॥ १०१ ॥
अष्टोत्तरश्शतश्लोकैः स्तोत्राद्यैः पूजयेद्यधाः ।
त्रिसंध्यं मोक्षमाप्नोति एक बिल्वं शिवार्पणम् ॥ १०२ ॥
दन्तिकोटिसहस्राणां भूः हिरण्यसहस्रकम् ।
सर्वक्रतुमयं पुण्यम् एक बिल्वं शिवार्पणम् ॥ १०३ ॥
पुत्रपौत्रादिकं भोगं भुक्त्वाचात्रयधेप्सितम् ।
अंतेज शिवसायुज्यम् एक बिल्वं शिवार्पणम् ॥ १०४ ॥
विप्रकोटिसहस्राणां वित्तदानाश्चयत्फलम् ।
तत्फलं प्राप्नुयात्सत्यम् एक बिल्वं शिवार्पणम् ॥ १०५ ॥
त्वन्नामकीर्तनं तत्त्वतवपादाम्बुयः पिबेत् ।
जीवन्मुक्तोभवेन्नित्यम् एक बिल्वं शिवार्पणम् ॥ १०६ ॥
अनेकदानफलदम् अनन्तसुकृतादिकम् ।
तीर्थयात्राखिलं पुण्यम् एक बिल्वं शिवार्पणम् ॥ १०७ ॥
त्वं मां पालय सर्वत्र पदध्यानकृतं तव ।
भवनं शाङ्करं नित्यम् एक बिल्वं शिवार्पणम् ॥ १०८ ॥
उमयासहितं देवं सवाहनगणं शिवम् ।
भस्मानुलिप्तसर्वाङ्गम् एक बिल्वं शिवार्पणम् ॥ १०९ ॥
सालग्रामसहस्राणि विप्राणां शतकोटिकम् ।
यज्ञकोटिसहस्राणि एक बिल्वं शिवार्पणम् ॥ ११० ॥
अज्ञानेन कृतं पापं ज्ञानेनाभिकृतं च यत् ।
तत्सर्वं नाशमायात् एक बिल्वं शिवार्पणम् ॥ १११ ॥
अमृतोद्भववृक्षस्य महादेवप्रियस्य च ।
मुच्यंते कंटकाघातात् कंटकेभ्यो हि मानवाः ॥ ११२ ॥
एकैकबिल्वपत्रेण कोटियज्ञफलं भवेत् ।
महादेवस्य पूजार्थम् एक बिल्वं शिवार्पणम् ॥ ११३ ॥

एककाले पठेन्नित्यं सर्वशत्रुनिवारणम् ।
द्विकालेच पठेन्नित्यं मनोरथफलप्रदम् ।

त्रिकालेच पठेन्नित्यम् आयुर्वर्ध्यो धनप्रदम् ।
अचिरात्कार्यसिद्धिं च लभते नात्र संशयः ॥ ११४ ॥

एककालं द्विकालं वा त्रिकालं यः पठेन्नरः ।
लक्ष्मीप्राप्तिश्शिवावासः शिवेन सह मोदते ॥ ११५ ॥

कोटिजन्म कृतं पापम् अर्चनेन विनश्यति ।
सप्तजन्मकृतं पापं श्रवणेन विनश्यति ।
जन्मान्तरकृतं पापं पठनेन विनश्यति ।
दिवारात्रकृतं पापं दर्शनेन विनश्यति ।
क्षणेक्षणेकृतं पापं स्मरणेन विनश्यति ।
पुस्तकं धारयेद्देहि आरोग्यं भयनाशनम् ॥ ११६ ॥
इति बिल्वाष्टोत्तर शतनामावलिः समाप्ता ॥

---

Encoded by Durga Prasad S. P. N. ¡spndurgaprasad@hotmail.com¿

---

Please send corrections to sanskrit@cheerful.com
Last updated August 17, 2002